# आदर्शपाठयोजना (2023-24)
# (संस्कृत-व्याकरणशिक्षणम्)

| | | |
|---|---|---|
| **विषयः - संस्कृतम्** | **कालांशः - द्वितीयः** | **कक्षा - नवमी/दशमी** |
| **उपविषयः - "बहुव्रीहिसमासः"** | **अवधिः - 40 निमेषाः** | **दिनाङ्कः - 28.03.23** |

## 1. अधिगमस्य प्रतिफलानि –

i. छात्रेषु संस्कृतव्याकरणं प्रति रुचेः जागरणं भविष्यति।
ii. छात्रेषु संस्कृतव्याकरणसम्बद्धानां कारकानां प्रत्ययानां समासादीनां नियमानाञ्च ज्ञानं भविष्यति।
iii. छात्रेषु संस्कृतव्याकरणसम्बद्धानां ध्वनितत्त्वानां ज्ञानं भविष्यति।
iv. छात्रेषु शुद्धवाक्यरचनायाः योग्यता उत्पन्ना भविष्यति।
v. व्याकरणदृष्ट्या शुद्धवाक्यप्रयोगस्य सामर्थ्यस्य प्राप्तिः भविष्यति।
vi. छात्राः सरलसंस्कृतभाषया कक्षोपयोगीनि वाक्यानि वक्तुं समर्थाः भविष्यन्ति।
vii. छात्रेषु रचनायाः सृजनात्मकप्रवृत्तेः विकासो भविष्यति।
viii. छात्रेषु श्रवणस्य भाषणस्य लेखनस्य पठनस्य चेतेषां चतुर्णां भाषिककौशलानां विकासो भविष्यति।

## 2. अनुदेशात्मकानि उद्देश्यानि –

**ज्ञानात्मकपक्षः –**

i. छात्राः सामासिकशब्दानां स्मरणं कर्तुं शक्ष्यन्ति।
ii. छात्राः बहुव्रीहिसमासयुक्तानां पदानां परिचयं कर्तुं शक्ष्यन्ति।

**बोधात्मकपक्षः –**

i. छात्रेषु समासयुक्तानां पदानां प्रयोगस्य योग्यतायाः वृद्धिकरणम्।
ii. छात्राः पाठे उपयुक्तानां सामासिकपदानां विग्रहपदानां च लेखनं करिष्यन्ति।

**प्रयोगात्मकपक्षः –**

i. छात्रेषु बहुव्रीहिसमासस्य विग्रहाभ्यासस्य कौशलम् उत्पन्नं भविष्यति।
ii. छात्रेषु शुद्धरूपेण सामासिकपदैः वाक्यनिर्माणस्य क्षमता उत्पन्ना भविष्यति।

**सृजनात्मकपक्षः –**

i. छात्राः संस्कृतभाषायां सामासिकशब्दानां विश्लेषणं कर्तुं शक्ष्यन्ति।
ii. छात्राः सामासिकानां शब्दानां मूल्याङ्कनकरणे सफलाः भविष्यन्ति।

## 3. शिक्षणविधयः -

आगमनविधिः — विश्लेषणविधिः
प्रश्नोत्तरविधिः — संश्लेषणविधिः

## 4. शिक्षणाधिगमसामग्री -

| | | |
|---|---|---|
| श्यामपट्टः | सुधाखण्डः | मार्जनी |
| पाठ्यपुस्तकम् | सङ्केतकः | चार्ट |

## 5. पूर्वज्ञानानुमानम् -

छात्राः सामासिकपदानां विग्रहपदानाञ्च विषये पूर्वमेव जानन्ति एव।

## 6. पूर्वज्ञानपरीक्षणम्

| अध्यापकस्य क्रियाः | छात्राणां क्रियाः |
|---|---|
| 1. 'पञ्चपात्रम्' इत्यस्य शब्दस्य विग्रहः कः? | पञ्चानां पात्राणां समाहारः। |
| 2. 'पञ्चगवम्' इत्यस्य शब्दस्य विग्रहः कः? | पञ्चानां गवां समाहारः। |
| 3. 'त्रयाणां भुवनानां समाहारः' अस्य समस्तपदं किम्? | त्रिभुवनम्। |
| 4. 'त्रयाणां लोकानां समाहारः' अस्य समस्तपदं किम्? | त्रिलोकी। |
| 5. 'पीताम्बरः' अस्य शब्दस्य विग्रहः कः? | छात्राः मौनं धारयन्ति। (समस्यात्मकः प्रश्नः) |

## 7. उद्देश्यकथनम् -

प्रियाः! छात्राः! अद्य वयं **'बहुव्रीहिसमासविषये'** विस्तारपूर्वकं पठिष्यामः।

## 8. प्रस्तुतीकरणम् -

| शिक्षणबिन्दवः | अध्यापकस्य क्रियाः | छात्राणां क्रियाः | श्यामपट्टकार्यम् |
|---|---|---|---|
| | अध्यापकः श्यामफलके सामासिकशब्दानाम् उदाहरणानि लेखिष्यति, छात्रैः उत्तरपुस्तिकायां लेखनाय च निर्दिश्यति। | छात्राः सामासिकशब्दानाम् उदाहरणानि उत्तरपुस्तिकायां लेखिष्यन्ति। | दशाननः, पीताम्बरः, श्वेताम्बरः, नीलकण्ठः |
| निरीक्षणम् | अध्यापकः छात्रैः लिखितानां शब्दानां निरिक्षणं करोति। | | |

| | | | |
|---|---|---|---|
| **विश्लेषणम्** | अध्यापकः सर्वाणि उदाहरणानि विश्लेष्यति :-<br><br>**(1) दशाननः :-**<br><br>(i) **'दशाननः'** – अस्य शब्दस्य विग्रहः कः?<br>(ii) अस्य पूर्वपदं किम्?<br>(iii) उत्तरपदं किम्?<br>(iv) अत्र समस्तपदे कस्याः विभक्तेः लोप अस्ति? | छात्राः ध्यानेन शृण्वन्ति अवगच्छन्ति च। | (i) **दशाननः** = दश आननानि यस्य सः।<br>(ii) दश।<br>(iii) आननः।<br><br>(iv) प्रथमाविभक्तेः। |
| | **(2) पीताम्बरः :-**<br><br>(i) **'पीताम्बरः'** अस्य शब्दस्य विग्रहः कः?<br>(ii) अस्मिन् पदे पूर्वपदं किम्?<br>(iii) अस्मिन् पदे उत्तरपदं किम्?<br>(iv) अत्र समस्तपदे कस्याः विभक्तेः लोपः? | छात्राः ध्यानेन शृण्वन्ति अवगच्छन्ति च। | **पीताम्बरः** = पीतम् अम्बरं यस्य सः।<br>पीतम्।<br>अम्बरः।<br>प्रथमाविभक्तेः। |
| | **(3) श्वेताम्बरः :-**<br><br>(i) **'श्वेताम्बरः'** अस्य शब्दस्य विग्रहपदं किम्?<br>(ii) इत्यस्मिन् पदे पूर्वपदं किम्?<br>(iii) इत्यस्मिन् पदे उत्तरपदं किम्?<br>(iv) अत्र समस्तपदे कस्याः विभक्तेः लोपः? | छात्राः ध्यानेन शृण्वन्ति अवगच्छन्ति च। | **श्वेताम्बरः** = श्वेतम् अम्बरं यस्य सः।<br>श्वेतम्।<br>अम्बरः।<br>प्रथमाविभक्तेः। |
| | **(4) नीलकण्ठः :-**<br><br>(i) **'नीलकण्ठः'** अस्य शब्दस्य विग्रहः कः?<br>(i) अस्मिन् पदे पूर्वपदं किम्?<br>(ii) अस्मिन् पदे उत्तरपदं किम्?<br>(iii) अत्र समस्तपदे कस्याः विभक्तेः लोप अस्ति? | छात्राः ध्यानेन शृण्वन्ति अवगच्छन्ति च। | **नीलकण्ठः** = नीलः कण्ठः यस्य सः।<br>नीलः।<br>कण्ठः।<br><br>प्रथमाविभक्तेः। |
| **नियमीकरणम्** | • यत्र पूर्वपदस्य उत्तरपदस्य च प्राधान्यं न भवति, अपितु कस्यचिद् अन्यस्य पदस्य प्राधान्यं भवति, तत्र बहुव्रीहिः समासो भवति। | छात्राः ध्यानेन शृण्वन्ति उत्तरपुस्तिकायां च लिखन्ति। | यत्र पूर्वपदस्य उत्तरपदस्य च प्राधान्यं न भवति, अपितु कस्यचिद् अन्यस्य पदस्य प्राधान्यं भवति, तत्र बहुव्रीहिः समासो भवति। |

| **9. पुनरावृत्तिकार्यम् –**<br><br>प्रश्नः 1. बहुव्रीहिसमासे कस्य पदस्य प्राधान्यं भवति?<br>प्रश्नः 2. 'नीलम् अम्बरं यस्य सः' अत्र समस्तपदं किम्?<br>प्रश्नः 3. 'श्वेताम्बरः' अस्य पदस्य विग्रहः कः?<br>प्रश्नः 4. 'पीताम्बरः' अस्य पदस्य विग्रहः कः? | 1. अन्यपदस्य।<br>2. नीलाम्बरः।<br>3. श्वेतम् अम्बरं यस्य सः।<br>4. पीतम् अम्बरं यस्य सः। | |
|---|---|---|

**10. गृहकार्यम् -**

1. **"बहुव्रीहिः"** इत्यस्य समासस्य लक्षणोदाहरणं लिखित्वा स्मृत्वा च आगच्छन्तु।
2. चन्द्रमुखी, चतुर्मुखः, चक्रपाणिः, सपुत्रः, शूलपाणिः इत्यादीनां पदानां विग्रहं कृत्वा उत्तरपुस्तिकायां च लिखित्वा आगच्छन्तु।
3. 'चन्द्रमुखी' अस्य पदस्य विग्रहपदं लिखत।
4. 'नीलम् अम्बरं यस्य सः' अस्य समस्तपदं लिखत।
5. पाठ्यपुस्तकस्य आधारेण पञ्चसामासिकपदानि तेषां विग्रहपदानि च लिखत।